SHODHPATRA: INTERNATIONAL JOURNAL OF SCIENCE AND HUMANITIES
E-ISSN: 3048-6041 | Volume- 2, Issue- 7 | July 2025

# आधुनिक शिक्षण व्यवस्थायां, गुरुकुल शिक्षण समन्वयः

**Mr. Vikas Gurikar**
Assistant Teacher (Sanskrit), Sri Satya Sai Gurukulam, Mandya, Karnataka, India

**सारांशः**

संप्रति भारतदेशे या शिक्षण व्यवस्था राराजते सा न भारतीयानाम्। अपितु अन्ग्लजनैः यदा भारतम् आक्रमितं तत् काले तैः प्रसारितं शिक्षणम् इदम्। अतः एव इदानीन्तन युवकानां / युवतीनां च शिक्षण व्यवस्था तथा च संप्रदाय आचरण परम्परा च समाजे नैव दृश्यते। एतस्य सर्वस्य मूलकारणं वर्तते आन्ग्लजनानाम् शिक्षण व्यवस्था आरोपणम् एव। न केवलं आन्ग्लजनानां अपि तु मोघल्, पोर्चिस, इत्यादि विदेशी जनानाम् अपि प्राबल्यं दरीदृश्यते।

यावत् पर्यन्तम् एतेषाम् आक्रमणं न आसीत् तावत् पर्यन्तं भारत देशस्य शिक्षण व्यवस्था अतीव सुन्दरम् आसीत्। कुतः नाम गुरुकुल व्यवस्थायां सर्वे छात्राः आचार्यैः सह मिलित्वा एव जीवनं कुरुवन्ति स्म। गुरुकुले पुस्तकं विना एव पाठः भविष्यति स्म। तेन छात्राणां मतिः अतीव दृढा आसीत्। तथा च प्रातः ब्राह्मी मुहूर्ते उत्थानम्, योगासनम्, अल्पाहारः कालत्रये संध्यावनदनम्, कालद्वये अग्नि कार्यम्, गुरुसेवा, गुरुकुल सेवा, भिक्षाटनम् ईत्येवं कार्याणि भवन्ति स्म। यदा छात्राः एतादृशं कार्यं कुर्वन्ति तदा तेषां मनो शुद्धिः, वाक् शुद्धिः, काय शुद्धिः भवति।

अतः एव तद् गुरुकुलम् इति उच्यते। यत्र छात्राः, आचार्याः सर्वे मिलित्वा भवन्ति। गुरोः कुलम् एव गुरुकुलम्। गुरुकुले ये पठन्ति ते सर्वे समाजस्य उद्धारकाः भवन्ति, भारत देशस्य सान्स्कृतिक रायभारिणः भवन्ति। तेन च समग्र भारत देशस्य अभिवृद्धये तेषामेव योगदानम् अधिकं भवति। वेद, उपनिषत्, पुराणानां, भारतीय ज्ञान परम्परायाः उन्नतये / अभिवृद्धये तेषां योगदानम् अविस्मरनीयम्। अतःकारणात् संप्रति आधुनिक शिक्षण व्यवस्थायां यदि वयं गुरुकुल शिक्षण व्यवस्थायाः समन्वयं कुर्मः, तदा छात्राणाम् वर्धनम्, स्वदेशस्य विषये गौरवभावः, स्व परम्परायाः पालनम्, एत्येवं बहवः विषयाः ज्ञायन्ते। अतः एव संप्रति गुरुकुल शिक्षण व्यवस्थायाः विषये सविस्तरम् उक्त्वा, तस्य आधुनिक जीवने अथवा शिक्षणे कथम् अन्वयः इति उच्यते।।

**कूटशब्दः :** गुरुकुलम्, शिक्षणव्यवस्था, आधुनिकम्, परिवर्तनम्, छात्राः।

**प्रस्तावना :**

आधुनिक शिक्षण व्यवस्थायां, गुरुकुल शिक्षण समन्वयः कथम् इति सद्यः प्रस्तावना रूपेण उच्यते।

आधुनिक शिक्षण व्यवस्थायां तावत् किं जायमानं वर्तते इति उक्त्वा अग्रे सरामः। आधुनिक शिक्षण व्यवस्थायां छात्राः केवलम् अङ्क प्राप्त्यर्थं पठन्ति। नतु जीवन साफल्य प्राप्त्यर्थम्। यदि अङ्कानाम् उपरि एव अस्माकं जीवनं स्थिरं चेत् जीवनं कथं यापयेयुः ?

इदानीन्तन काले तावत् क्वचित् विश्वविद्यालयेषु, शालाषु,गुरोरुपरि गौरवं नैव भवति। गुरुम् एव ताडयन्ति, तर्जयन्ति च क्वचित्। एतादृश शिक्षण व्यवस्था अपेक्षितं वा अस्मभ्यम् ? यदि एतादृश शिक्षण व्यवस्था एव अनुवर्तते, तर्हि निश्चयेन समाजस्य अवनतिः भविष्यति इत्यत्र न कोपि संशयः।

आधिक्येन ये छात्राः आधुनिकं शिक्षण व्यवस्थां अनुसरन्ति तेषां जीवनचर्या अपि बहु अव्यस्थितं भवति। अर्थात् स्वजीवनं कथं यापनीयम् इति न ज्ञायते। केचन केवलं पठन्ति, केचन केवलं रटन्ति, केचन क्रीडन्ति, केचन तु स्त्रीपान मत्तरताः भवन्ति। एवं चेत् कस्मिन् मार्गे वा अस्माकं भारतदेशस्य शिक्षण व्यवस्था अस्ति इति ज्ञातुं शक्यते। न केवलं

एतावता, इतोऽपि वर्तते। अतः आधुनिक शिक्षण व्यवस्थायां यदि वयं गुरुकुल शिक्षण व्यवस्थायाः समन्वयं कुर्मः तर्हि निश्चयेन आधुनिक शिक्षण व्यवस्था अपि परिवर्तिता भवति। तेन छात्राणां मनोबुद्धिः वर्धते।

अस्तु, तर्हि एतावता आधुनिक शिक्षण व्यवस्थायाः विषये उक्त्वा, तस्त समीकरणार्थं गुरुकुल शिक्षण व्यवस्थायाः समन्वयः कर्तव्यः इति प्रतिपादितम्। तर्हि किं नाम गुरुकुलम्, गुरुकुल शिक्षण व्यवस्था का, तद् कुत्र प्राप्तुं शक्यते, तस्य कः लाभः, तेन समाजस्य उद्धारः कथम्, छात्राणाम् अभिवृद्धिः वा कथं जायते, इत्यादि सर्वेषां प्रश्नानाम् उत्तरं सविस्तरम् उक्त्वा, सर्वेषां वाक्यानां विवरनं सप्रमाणं निरूप्यते।

समग्र प्रपञ्चे, आभारतम् अभिव्याप्य बहूनि गुरुकुलानि वर्तन्ते। प्रति गुरुकुले अपि शिक्षण व्यवस्था भिद्यते। उदाहरणार्थम् ....

क्वचित् गुरुकुलेषु केवलं वेदाध्ययनम्।

क्वचित् गुरुकुलेषु केवलं शास्त्राध्ययनम्।

क्वचित् गुरुकुलेषु केवलं शिल्पकला।

क्वचित् गुरुकुलेषु केवलं कर्मकाण्ड अध्ययनम्।

क्वचित् गुरुकुलेषु केवलं पौरोहित्य अध्ययनम्।

एवं बहु प्रकाराः वर्तन्ते। अतः भारतदेशे यावन्ति गुरुकुलानि वर्तन्ते, तेषां सर्वेषां गुरुकुलानाम् अध्ययनं, तत्रत्य छात्राणां विषये चिन्तनं वा बहु दुष्करम्। कुतः नाम सर्व विद्याप्रदायक गुरुकुलानि केवलम् अङ्गुलीगणनियानि। अतः भारतदेशे कुत्र सर्व विद्या प्रदायक गुरुकुलानि वर्तन्ते इति चिन्तनं मया कृतम्। तत् काले RSS माध्यमेन कर्नाटक राज्ये त्रिणी गुरुकुलानि विराजन्ते। संप्रति RSS माध्यमेन कर्नाटक राज्यस्य गुरुकुलानाम् आधारेण आधुनिक शिक्षण व्यवस्थायां कथं गुरुकुल शिक्षण समन्वयः इति अहं सविस्तरं, सश्रद्धं, यथामति, यथाशक्ति प्रस्तौमि।।

आदौ तावत् कर्नाटक राज्ये RSS माध्यमेन आरब्धानां गुरुकुलानां विषये ज्ञास्यामः। तत्र त्रिणी गुरुकुलानि वर्तन्ते।

१) मैत्रेयी गुरुकिलम्

२) प्रबोधिनी गुरुकुलम्

३) वेद विज्ञान गुरुकुलम्

तत्र सर्व प्रथमं वर्तते मैत्रेयी गुरुकुलम्।।

इदं मैत्रेयी गुरुकुलं 22-07-1994 तमे दिनाङ्के कर्नाटक राज्यस्य दक्षिण कन्नड मण्डले मूर्कजे इति पवित्र क्षेत्रे आरब्धम्। अत्र ब्रह्मवादिनी परम्परायाः आचरणं वर्तते। अतः केवलं बालिकाः केवलम् अत्र पठन्ति। ताषां बालिकानां सर्वतोमुख अभिवृद्ध्यर्थं आचार्याः, मातरः सर्वे अहर्निशं कार्यरताः भवन्ति। अत्र गुरुकुले कश्चित् विनूतनः आयामः बालिकाभिः अनुसर्यते। अत्र गुरुकुले प्राथमिक अध्ययनं 5 वर्षाणि, तदनन्तरम् उन्नताध्ययनं 7 वर्षाणि भवन्ति। तत् प्राक् वयं तासां दिनचर्यां पश्यामः।।

अत्र गुरुकुले बालिकाः प्रातः ब्रह्म मुहूर्ते एव उत्थाय कार्य तत्पराः भवन्ति। तद् इदानिं पश्यामः।।

०४:४५ – ०५:१५ उत्थानम् (जागृत)

E-ISSN: 3048-6041 | Volume- 2, Issue- 7 | July 2025

०५:१५ – ६:१५ स्नानं योगं च

०६:१५ – ६:४५ कर्म योग (श्रम सेवा)

६ - ४५ – ७ - १५ वेद मन्त्र तथा भगवद्गीता श्लोक का पाठ एवं कण्ठस्थीकरण

७ - १५ – ७ - ४५ पूजा

७ - ४५ – ८ - १५ अल्पाहार

८ - १५ – ८ - ४५ व्यक्तिगत कार्यम्

८ - ४५ – ९ - १५ भरटनाट्यम् एवं संगीत का अभ्यास

९:३० – १०:०० भगवद्गीता / वेद / जप

१०:०० – १२:३० कक्षासत्रम्

१२:३० – २:०० मध्याह्नभोजनसमयः

२:०० – ३:३० वर्गसत्रम्

३:३० पानीयम्

४:०० – ४:४५ कक्षा समय

५:०० – ५:४५ क्रीडासमयः

५:४५ – ६:०० राष्ट्र सेविका समिति प्रार्थना

६:०० – ६:१५ व्यक्तिगत साधना (अनुष्ठान) २.

६ - १५ – ६:३० भजनम्

६:३० – ७:१५ स्वाध्याय

७:३० भोजनम्

८:०० – ८:४५ स्वाध्याय

८ - ४५ – ९ – १५ अनौपचारिकम् (अनौपचारिक वार्तालाप)

९:३० लघुबालिकाः निद्रां गच्छन्ति

१०:०० ज्येष्ठाः बालिकाः निद्रां गच्छन्ति।।

एवं रित्या बालिकाः स्वीय जीवनम् अनुसरन्ति। तेन च ताषां जीवने परिवर्तनं भवति। इदं केवलं दिनचर्या केवलम्। इतःपरं तासाम् अध्ययन विषयक ज्ञानराशीम् अवलोकयामः। अत्र गुरुकुले पञ्चमुखी शिक्षण व्यवस्था वर्तते।

**वेदः**

E-ISSN: 3048-6041 | Volume- 2, Issue- 7 | July 2025

**योगः**

**कृषिः**

**विज्ञानम्**

**कलाकौशलम्**

अत्र पञ्चमुखी शिक्षण व्यवस्था अनुसर्यते। प्रति मुखम् अपि अत्रत्य बालिकाभिः समूलं पठ्यते। न केवलम् एतावता स्त्रीभीः यावद् अध्येतुं शक्यते तद् सर्वम् ताः पठन्ति। यथा साहित्यम्, सन्गीतम्, आन्ग्लं तथा हिन्दी भाषाम्, ग्रन्थालय ज्ञानम् इत्येवम् अध्ययन प्रनाल्यां वर्तते।

तेन च तासाम् आहार शैली अपि विशेषः अस्ति। किं नाम सम्पूर्णतया शुद्ध शाखाहारः ताभिः उपयुज्यते। तत्रापि विशेषो नाम पलाण्डुः तथा लशुनं तत्र नैव उपयुज्यते। तेन कारणेन एव तासां बुद्धिः वर्धते। तत्रत्य बालिकाः श्रृङ्गेरी जगद्गुरुणाम् अन्तिके भगवद्गीतायाः संपूर्ण कण्ठपाठं निवेदितवन्तः। एवमेव ताभिः बहूनि साधनानि कृतानि। तत्रत्य आचार्याः, मातरः अपि साहाय्यम् आचरन्ति।।

अस्तु तर्हि एतावता मैत्रेयी गुरुकुलस्य विषये उक्तम्। तत्रत्य बालिकानां विषये, तासां दिनचर्यायाः विषये, अध्ययन विषये च उक्तम्। संप्रति आधुनिक शिक्षण व्यवस्थायां कथम् तस्य समन्वयः इति सप्रमाणम् उच्यते।

अत्र विशेषेण बालिकाः वर्तन्ते इत्यतः आधुनिक जगतः स्त्री जनानां साकं तुलनां कुर्मः। किं गुरुकुले ताभिः या दिनचर्या पाल्यते, सा आधुनिक स्त्रीभिः पालयितुं शक्तये ?

इति चेत् बहु दुर्लभम्। कुतो नाम गुरुकुले ताभ्यः आचार्याणां सकाशात्, मातापितृभ्यां संस्कारः प्राप्तः भवति। तैरुक्तं ताः मनसा पालयन्ति। प्रतिदिनं जपः, गोसेवा, भुसेवा, वनस्पति सेवा, गुरु / मात्रुश्रि सेवा, ताभिः क्रियते इत्यतः एतादृशी दिनचर्या ताभिः पाल्यते। किम् आधुनिक सर्वाः स्त्रीयः इदं पालयन्ति चेत् न। केवलम् काश्चन एव पालयन्ति। तदपि आध्यात्मिक वासना बलेन एव, नतु अन्यद् कारणमस्ति।।

परन्तु बालिकाः प्रातः कदावा उत्थाय, प्रातः एव चायं, काफ़ि, इत्यादिकं पिबन्ति। तेन आरोग्यं नश्यति। किं ताः स्वीय कार्यं स्वयम् कुर्वन्ति ? नैव। सर्वं कार्यं मातुः हस्ते कारयन्ति, पितुः हस्ते कारयन्ति। भुक्तस्य स्थालिकायाः प्रक्षालनम् अपि ताभिः न क्रियते इति स्थितिः इदानीन्तन जगति वर्तते। सम्यक आहार पालनं न कुर्वन्ति। तेन तासां रुतुचर्यायां अव्यस्था भवति। तेन आरोग्ये तस्य परिणामः दृश्यते। अस्तु भवतु : प्रातः / सायङ्काले, कदाचित् वा देवपुजाम् आचरन्ति वा इति चेत्, न। केवलं ग्रामीण भागस्य बालिकाः, क्वचित् अन्यत्र स्यात्। परन्तु बहुत्र बालिकाः इदं सर्वं नैव कुर्वन्ति। एतद् कारणाद् एव भक्तिभावः न उदेति। तेन मनसः निग्रहणं न जायते। मनोचाञ्चल्यं वर्धते।।

किम् आध्यात्मिक चिन्तनं कुर्वन्ति ? नैव। कुतः नाम तदर्थं समयः नास्ति। केवलं फोन्, थेटर्, प्रियकरः, प्रवासः, इत्यादिषु एव समयं यापयन्ति। देव प्रार्थनार्थं समयः न भवति इति एव उत्तरम् आयति। एवं रूपेण वदन्तः भवेम चेत् बहूनि पुस्तकानि लेखनियानि भवन्ति। अतः गुरुकुल शिक्षणमेव उचितम् इति उच्यते।

एतावता उक्तं सर्वं गुरुकुल बालिकाः पालयन्ति वा इति प्रश्नः सर्वेषां भवत्येव। सत्यम् इदं सर्वं गुरुकुल बालिकाः पालयन्ति। तेन कारणेन एव खलु भगवद्गीतायाः, मूल रामायणस्य, वेदस्य, शस्त्रस्य अध्ययनं कर्तुं शक्ये। मनः चञ्चलं चेत् कथम् वा इदं सर्वम् अध्येतुं शक्यते। अतः यदि आधुनिक शिक्षण व्यवस्थायां गुरुकुल परम्परायाः समन्वयः क्रियते, तेन बालिकाः / स्त्रियः निश्चयेन संमार्गिनः भवन्ति। आध्यात्मिक जीवने रताः भवन्ति। तेन गोसेवा, भूसेवा, इत्यादि

अनुसरणम् आरभ्यते। अन्ततोगत्वा स्त्रीनां सर्वतोमुख अभिवृध्यर्थं मैत्रेयी गुरुकुलस्य पद्धतिः यदि अनुसर्यते तर्हि ताः समीचीन मातरः, अनुजाः, अग्रजाः, भगिन्यः, पत्नयः, सेविकाः, भूत्वा समाजे उन्नतं पदं प्राप्नुवन्ति। तदर्थं गुरुकुल शिक्षण व्यवस्था अत्यन्तम् अनिवार्या।।

इतःपरं प्रबोधिनी गुरुकुलस्य तथा वेद विज्ञान गुरुकूलस्य विषये पश्यामः। वस्तुतः एतयोः पृथक् व्याख्यानं नापेक्षितम्। कुतो नाम उभयोः मध्ये लघु परिवर्तनम् अस्ति तावदेव। तद् विहाय एतयोः सिद्धान्तः, परम्परा सर्वं संमानम् एव। तथापि परिचयार्थं पृथक् विवरनं क्रियते।

**प्रबोधिनी गुरुकुलम्**

प्रबोधिनी न्यासः स्वस्थसमाजस्य स्थापनायाः लक्ष्येण २३-०२-१९७९ दिनाङ्के कर्नाटक राज्यस्य चिक्कमगलुरु मण्डलस्य हरिहरपुर ग्रामे, चित्रकुट परिसरे पवित्र तुङ्गा नद्याः तीरे स्थापितः। न्यासः सम्पूर्णे चिक्कमगलुरु-मण्डले सामाजिक-शैक्षिक-सेवा-क्रियाकलापैः संलग्नः अस्ति।

प्रबोधिनीन्यासस्य मुख्यालयः चित्रकूटनगरे पवित्रतुंगानद्याः तीरे अस्ति। चित्रकूटं समृद्धेन पश्चिमवनेन आच्छादितम् अस्ति। प्रबोधिनी न्यासः श्रृङ्गेरीसमीपे स्थितः अस्ति। यत्र आदिगुरुशङ्कराचार्यः तपः कृत्वा श्री शारदा दक्षिणाम्नाय पीठं स्थापितवान्।

“प्रबोधिनी गुरुकुलम्” प्रबोधिनी न्यासस्य प्रमुखा परियोजना अस्ति, समृद्धहरितवनस्य मध्ये अयं परिसरः १० एकर्-क्षेत्रेषु विस्तृतः अस्ति। अस्माकं देशस्य शैक्षिकव्यवस्थायाः विषये बहु चर्चाः प्रचलन्ति, प्रयोगानां संख्या क्रियते, शिक्षाक्षेत्रे नैतिकमूल्यानि आनेतुं बहवः विचारधाराश्च प्रवर्तन्ते। प्रबोधीनी गुरुकुलं भारतस्य सांस्कृतिकमूल्यम् आनेतुं सुप्रसिद्धैः विद्वांसैः, समाजसेविभिः, शिक्षाविश्लेषकैः च कृतेषु एतादृशेषु अद्वितीयप्रयोगेषु अन्यतमः अस्ति।

गुरुकुलस्य उद्देश्यम्।।

स्वस्थ समाजस्य स्थापना। स्वस्थ व्यक्तीनां निर्माणम्।

पञ्चमुखीशिक्षणस्य सर्वेषु क्षेत्रेषु ५ वर्षाणाम् अन्तः बालकाः मूलभूतज्ञानं प्राप्नुवन्ति। तदनन्तरं ते उच्चतरं अध्ययनं कुर्वन्ति यत् केवलं कृषियोगाय एव अभिप्रेतम् अस्ति।

यथा वयं जानीमः यत् कृषिः एव मानवजातेः अन्नस्य स्रोतः अस्ति। वर्तमानभविष्यस्य नित्यं च प्रयोज्यम्। वैज्ञानिक-युगे कृषिः युवाभिः उपेक्षिता भवति। अस्मिन् क्षेत्रे उत्तमं रुचिं संवर्धयितुं वयं उच्चतर अध्ययनार्थं कृषीं प्रवर्तयामः।

अस्माकं सुवर्णकालः आसीत् यदा योगः जीवनविज्ञानरूपेण प्रदत्तः आसीत्। अधुना योगः सार्वभौमिकविज्ञानं जातः, सम्पूर्णं जगत् अस्माकं राष्ट्रं योगशिक्षणार्थं प्रतीक्षते। अस्माकं योगसंस्कृतेः संरक्षणं निरन्तरं च कर्तुं सर्वाधिकं आवश्यकता, दायित्वं च अस्ति। अस्य कृते युवानां महत् उद्यमं कर्तव्यम् आसीत्। एतत् मनसि कृत्वा वयं छात्राणां कृते उच्चशिक्षाम् आरब्धवन्तः। गुरुकुलस्य दिनचर्यां पश्यामः।।

५:०० वादने – उत्थानम्

५ - ४० - प्रथमः स्मरणम् (प्रार्थना)

६:०० वादने – स्वछता

०६:३० - ०७:०० यावत् - योग

०७:०० - ०७:४० यावत् - स्नानं

०७:४५ - ०८:०० यावत् - पूजा

०८:१५ - अल्पाहार

०९:३० - १२:०० यावत् - कक्षाः (३)

१२ - १० - १२ - ४० - योग निद्रा

०१:०० – ०२:०० वादनम् – मध्याह्नभोजनम्

०२:०० - ०४:३० यावत् - कक्षाः (३)

०४:३० वादनम् – पानीयम्

०५:००- ०६:०० वादनम् - क्रीडा- शारीरिक क्रियाकलापाः

०६:४०- ०७:०० वादनम् - अनुष्ठानम् ( आध्यात्मिक साधना) एवं भजनम्

०७:००- ०८:०० वादनम् - स्वाध्याय

०८:००- ०८:४५ यावत् - रात्रिभोजनम्

०९:००- ०९:३० वादनम् - टीवी / पुस्तकालयः

०९:४५ - प्रकाशः निष्क्रियः भवति।

अत्र प्रबोधिनी गुरुकुले बालकानां केवलम् अवकाशः अध्ययनार्थम्। अत्रापि मैत्रेयी गुरुकुलवत् आचरणं भवति। आहार, विहारे, योगे सर्वं समानम् एव। तेन च आहार शैली अपि विशेषः अस्ति। किं नाम सम्पूर्णतया शुद्ध शाखाहारः उपयुज्यते। तत्रापि विशेषो नाम पलाण्डुः तथा लशुनं तत्र नैव उपयुज्यते। तेन कारणेन एव बुद्धिः वर्धते। तत्रत्य बालकैः श्रृङ्गेरी जगद्गुरुणाम् अन्तिके भगवद्गीतायाः संपूर्ण कण्ठपाठं निवेदितवन्तः। एवमेव बहूनि साधनानि कृतानि। तत्रत्य आचार्याः, मातरः अपि साहाय्यम् आचरन्ति।।

इतःपरं तेषाम् अध्ययन विषयक ज्ञानराशीम् अवलोकयामः। अत्र गुरुकुले पञ्चमुखी शिक्षण व्यवस्था वर्तते।

**वेदः**

**योगः**

**कृषिः**

**विज्ञानम्**

**कलाकौशलम्**

अत्र प्रबोधिनी गुरुकुले तावत् आरम्भे 5 वर्षाणि सामान्य अध्ययनं भविष्यति। तदनन्तरम् उन्नताध्ययनम् 7 वर्षाणि भवति। तद् विशेषेण योग विषये तथा कृषि विषये केवलम्। तत्र बालकाः प्रतिदिनं गोसेवां, भूसेवां, गुरुसेवां कुर्वन्ति।

बालकाः सर्वदा क्रियाकलापैः रताः भवन्ति। अध्ययने, क्रीडायां उभयोः अपि प्रथमाः सन्ति। अन्ततोगत्वा लघु बालकानां जीवनं कथं भवति चेत् ते समाजे समीचीनाः भवन्ति इति प्रश्नस्य प्रबोधिनी गुरुकुलं प्रत्यक्षम् उदाहरणम्।

अतः इदं गुरुकुलं बहु प्रसिद्धम् अस्ति।।

**वेद विज्ञान गुरुकुलम्**

भारतदेशः प्राचीनज्ञानविज्ञानयोः निधिः। इयं भूमिः तादृशी यत्र श्रेष्ठः अध्यात्मयोगः उदपद्यते, यत्र च अनादिकालात् अध्यात्मयोगः निरन्तरम् अभ्यस्यमानः प्रसार्यमाणः च वर्तते। अस्याः भूम्याः पुत्राणाम् अस्माकम्, इदमाद्यं कर्तव्यं यत् अस्य वैदिकस्य ज्ञानस्य राशेः रक्षणम् अग्रिमासु सन्ततीषु अविच्छेदेन प्रसारणं च। एवम् उच्चैः लक्ष्यं कृत्वा, शिक्षा क्षेत्रेऽविरतसेवया प्रसिद्धः जनसेवा ट्रस्ट् नामकः संस्थानः, स्वस्य पञ्चचत्वारिंशद्वर्षपर्यन्तं निरन्तरं यत्ने, एकं महत्त्वपूर्णं पथं सम्प्राप्तवान्। एषः पथः ईश्वरसंवत्सरे ज्येष्ठमासे (१९९७ तमे वर्षे) पारम्परिकपद्धत्याधारितं वेदविज्ञानगुरुकुल स्थापनया सम्पन्नः, यः जनसेवा ट्रस्ट अर्धमण्डलमहोत्सवस्य (रजतजयन्त्याः) शुभसन्दर्भे समारब्धः।।

अत्र उन्नताध्यनार्थं छात्राः देश, विदेशात् आगच्छन्ति। वेद विज्ञान गुरुकुले विशेषतया 7 वर्षाणां शिक्षणमस्ति। तत्रापि विशिष्य शास्त्राणाम् अध्ययनं भविषति।

अद्वैत वेदान्तः, व्याकरणम्, न्यायः, मीमांसा, एत्येवं शास्त्राणि तत्र आचारैः बोध्यते।।

**गुरुकुलस्य लक्ष्याणि -**

1. वेदस्य शास्त्राणां (विज्ञानम्) योगस्य च परम्परायाः मूलस्वरूपस्य संरक्षणम्।
2. गुरुकुलशिक्षणक्रमस्य आधुनिके युगे प्रसारणम्।
3. सामाजिकचिन्तनस्य आध्मात्मिकान्तर्दृष्टेः संवर्धनम्।
4. आधुनिककाले ऋषिपरम्परायाः औचित्यस्य प्रख्यापनम्।
5. शास्त्राणां संस्कृतमाध्यमेन एव पाठनं संस्कृतसंभाषणस्य प्रसारणं च।

**गुरुकुलस्य मूलभूतचिन्तनम् -**

भारतदेशस्य शास्त्रपरम्परा जगति महागौरवं भजते। इयं परम्परा गुरुकुलशिक्षणेन एव संरक्षिता भवति इति अस्माकं विश्वासः। पाश्चात्त्यस्य जगतः उपभोगवादस्य वर्धमानेन प्रभावेण देशेऽस्मिन् उत्साहिनः युवानः युवत्यश्च अस्याः परम्परायाः संरक्षणे क्षीयमानाः दृश्यन्ते।

एतादृशे अवसरे युवानः युवत्यश्च भारतीयज्ञानविज्ञानक्षेत्रे बद्धादराः सन्तः कार्यरताः भवेयुः। वेदस्य वेदान्तस्य च विद्वांसः स्वेषु वैज्ञानिकदृष्टिं वर्धयेयुः, सामाजिककर्तव्यं च स्मरेयुः। विद्वत्ता सम्यक्तया प्रकाशिता भवेत्। ब्राह्मबलाधिष्ठितं क्षात्रबलं च भवेत् इति अस्माकम् अभिलाषा।

**गुरुकुलशिक्षणस्य विशिष्टाः अंशाः -**

- इदं शिक्षणं व्यक्तित्वस्य विकासार्थं, न तु विषयस्य सङ्ग्रहार्थम्।
- छात्राः आचार्येभ्यः हृद्ये वातावरणे अध्ययनं कुर्वन्ति।

- अध्ययनं संशोधनं च तज्ज्ञानां विदुषां मार्गदर्शने क्रियते।
- शिक्षणस्य माध्यमः संस्कृतम्।
- शिक्षणस्य पञ्च मुखानि विद्यन्ते – वेदः, विज्ञानं, योगः, कृषिः, कला इति छात्राणां सर्वतः अभिवृद्ध्यर्थम्।
- समाजाभिमुखचिन्तनं वर्धयितुं नित्यशाखा, ग्रामसम्पर्कः, संस्कृतशिबिराणि इत्यादीनि सामाजिककार्याणि आयोज्यन्ते।
- नित्यशिक्षणं जातिमितिम् अपरिगणय्य सर्वेभ्यः दीयते। समाजे च अस्य ज्ञानस्य प्रसारः जातेः लिङ्गस्य च भेदं विना एव क्रियते।
- छात्राः आधुनिकशिक्षणमपि विश्वविद्यालयेभ्यः वेदयोगवेदान्तानां शिक्षणेन सह प्राप्नुवन्ति।
- अत्र गुरुकुले पञ्चमुखी शिक्षण व्यवस्था वर्तते।
- वेदः
- योगः
- कृषिः
- विज्ञानम्
- कलाकौशलम्

एतावता त्रीणि गुरुकुलानि व्याख्यातानि। तेषां आधुनिक जीवने अथवा शिक्षणे समन्वयः कथम् इति इदानीम् पश्यामः।

**आधुनिक शिक्षण व्यवस्थायां, गुरुकुल शिक्षण समन्वयः** कथम् इति इदानीम् निरूप्यते।

**गुरुकुलशिक्षा**
गुरुकुले शिक्षा: प्राचीनभारते गुरोः समीपे वासेन, गुरौ सेवां कृत्वा, शान्तिपूर्वकं ज्ञानप्राप्तिः आसीत्। अत्र आत्मविकासः, आचारः, संस्कारः, चरित्रनिर्माणं च प्रमुखम्। शिक्षार्थिनः गुरुणा सह सहवासं कृत्वा जीवनोपयोगिनं ज्ञानं प्राप्नुवन्ति स्म। धर्मशास्त्राणि, वेदाः, गणितम्, ज्योतिषम्, आयुर्वेदः इत्यादीनाम् अध्ययनं समाहितचित्तेन क्रियते स्म। गुरुकुलपरम्परायाम् अनुशासनम्, विनयः, श्रद्धा, सेवा, आत्मसंयमः च अतीव महत्वम् अपगच्छत्।

**आधुनिकशिक्षा**
आधुनिकशिक्षा तु विद्यालयेषु, महाविद्यालयेषु च यन्त्रसहाय्येन सम्पद्यते। अत्र मुख्यतः प्रमाणपत्रलाभः, व्यवसायोपयोगि विषयाः च प्रधानम्। शैक्षिकपद्धतिः अधिकतया परीक्षा-केंद्रिता अस्ति। छात्राः अधिकं प्रतिस्पर्धायाम् अवस्थिताः भवन्ति, तथापि चारित्रिकविकासः, जीवनमूल्योपदेशः च न्यूनतया दृश्यते। सूचना-प्रौद्योगिकी, विज्ञानम्, अभियान्त्रिकी, व्यवस्थापनम् इत्यादयः विषयाः अधुनातनाः शिक्षायाम् अङ्गीकृताः सन्ति।

गुरुकुले अधीताः बालकाः / बालिकाः / युवकाः / युवत्यः सर्वदा स्व चरित्र्यवन्तः भूत्वा समाजस्य उद्धारार्थम् अहर्निशं कार्यरताः भवन्ति। परन्तु आधुनिक शिक्षणम् ये प्राप्तवन्तः ते सर्वदा स्वार्थचिन्तनं कुर्वन्ति। अतः गुरुकुल शिक्षणम् अत्यन्तम् अनिवार्यम्।।

**उपसंहारः**

E-ISSN: 3048-6041 | Volume- 2, Issue- 7 | July 2025

समस्ते जगति शिक्षा एव समुन्नतिसाधनस्य मूलाधाररूपेण प्रतिष्ठिता अस्ति। भारतदेशे प्राचीनकाले गुरुकुलपद्धत्या जीवनमूल्ययुक्ता शिक्षा प्रदत्ता आसीत्। तत्र शिष्याः गुरुणा सह वसन्तः, सेवां कुर्वन्तः, आत्मविकासं, चारित्रशुद्धिं, शीलसम्पन्नतां च प्राप्नुवन्ति स्म। वेदानां, शास्त्राणां, तथा संस्काराणां गहनं अध्ययनं गुरुकुलेषु विधिवत् क्रियते स्म। गुरोः कृपया शिष्यस्य व्यक्तित्वविकासः, आत्मसंयमः, ज्ञानप्राप्तिः च सम्यक् सम्पन्नः।

परं कालान्तरेण शिक्षापद्धत्याः स्वरूपे महतः परिवर्तनम् अभवत्। औद्योगिकक्रान्तेः, तन्त्रविज्ञानस्य विकासस्य च प्रभावेन आधुनिकशिक्षायाः प्रवृत्तिः जात। विद्यालयेषु, महाविद्यालयेषु, विश्वविद्यालयेषु च शिक्षणं यन्त्रनिर्भरं, परीक्षामूलकम्, प्रमाणपत्रकेन्द्रितं च जातम्। छात्राः पुस्तकेषु सीमिताः, प्रतिस्पर्धायाम् निमग्नाः, जीवनमूल्यानां बोधे पुनरपि वञ्चिताः भवन्ति।

यद्यपि आधुनिकशिक्षा विज्ञानविकासं, कौशलवृद्धिं च वहति, तथापि तस्यां नैतिकशिक्षायाः अभावः प्रबलतः दृश्यते। अनेनैव कारणेन गुरुकुलपद्धत्याः मूल्यानि – यथा श्रद्धा, विनयः, अनुशासनम्, सेवाभावः, आत्मज्ञानम् च – अद्यतनशिक्षायामपि पुनरावश्यकानि सन्ति।

अतः, एतेषां द्वयोः शिक्षापद्धत्योः तुलनया, स्पष्टं दृश्यते यत् शिक्षायाः पूर्णत्वं तदा एव सिध्यति यदा आधुनिकविज्ञानं च गुरुकुलस्य मूल्याधारितशिक्षां च समन्वयपूर्वकं योज्यते। अत्रैव भारतस्य शिक्षातत्त्वस्य वैशिष्ट्यम् अस्ति – विज्ञानस्य च, अध्यात्मस्य च समुचितं मेलकम्। अतः भविष्यात् शिक्षायाः दिशा, आधुनिकतायाः आधारस्य मध्ये गुरुकुलशिक्षायाः स्थापनं कर्तव्यम् इत्येव उपसंहारस्य गूढार्थः।

**ग्रन्थसूची**

1. ಮನೆಯೇ ಮಾಂಗಲ್ಯ (Kannada Book) K. Naagakrishnappa
2. ब्रह्मचर्य जीवनम्, Prof. Ramachandra Bhat Kotemane
3. भारतीय विद्या, श्रीधर भास्कर वर्णेकर्
4. श्रीमद् भगवद्गीता, श्रीमद् ए.सि.भक्तिवेदान्त स्वामी प्रभुपादः
5. गुरुकुल शिक्षणम्, श्री वादिराज सि